# Maheshvara Tushtikarana Stuti by Mahakala

# महाकालकृता महेश्वरतुष्टिकरणस्तुतिः

## Document Information

Text title : Maheshvara Tushtikarana Stuti by Mahakala

File name : maheshvaratuShTikaraNastutiHmahAkAlakRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 6| 56-67||

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2023

*sanskritdocuments.org*

# महाकालकृता महेश्वरतुष्टिकरणस्तुतिः

महाकालः -
हर हर दुरितानि दीनबन्धो पुरहर पाहि दयाकटाक्षलेशैः ।
सुरहरशर हारकाकोदरनद्धामरण प्रसीद शम्भो ॥ १॥

तपनदहन पद्मजातमित्र प्रतिकृतिभूतमभूतवर्ग ।
मधुमथनाक्षिपूज्यपादपद्म प्रमथसनाथ महेश पाहि शम्भो ॥ २॥

मत्तानन्दकरीन्द्रदारणपटुं पञ्चास्यपञ्चाननं
गङ्गातुङ्गतरङ्गसङ्गतमहामौली पिशङ्गायितम् ।
शृङ्गासङ्गहरं कुरङ्गसङ्गविलसत्पाणिप्रभामण्डलं
तुङ्गातीरपतङ्गसोदरमहामूलस्थलिङ्गाकृतिम् ॥ ३॥

हिरण्यैकबाहुं हिरण्यैकरूपं हिरण्यैकवर्णं हिरण्यादिदेवम् ।
हिरण्याख्ययोर्हर्तृहन्तारमीशं हिरण्याचलावासकन्यासमेतम् ॥ ४॥

गम्भीरसागरनिषङ्गपिनाकपाणिं सोमाग्निविष्णुशरकृत्तपुरादिवर्गम् ।
क्ष्मास्यन्दनान्तरगतं शशिसूर्यचक्रं वेदाश्वसारथिविधिं रथिनां वरेण्यम् ॥ ५॥

नतोऽस्मीशमाद्यं सुराद्यैरपीड्यं सुगन्धिं नतोऽस्मि प्रपद्ये ह शश्वत् ।
नतोऽस्मीष्टसिध्यै नतोऽस्मीश सिद्ध्यै नतोऽस्मीश भक्त्या प्रपद्ये प्रपद्ये ॥ ६॥

नृत्तकृत्तकरिमस्तपदाब्ज ध्वस्तदक्षमख कृत्तिसुवासः ।
मारमारक चिरन्तनदुःखान्याशु संहर विभो दुरितानि ॥ ७॥

भवोद्भव मनोन्मनीसहित दिव्यगन्धोल्लसन्मरन्दसुमशीतलस्फुरदुरुप्रकर्षाङ्क ।
महेश्वर महाफणोच्छ्वसितभोगिभोगप्रिय प्रपञ्चरचनादर प्रवरदेव मां पालय ॥ ८॥

भव भावहृदन्तराब्जगप्रभवाभावभव स्थितिप्रद ।
गतभाव विदूर ... शम्भो भवबन्धं प्रविनाशयाशु मे ॥ ९॥

भव भूतपते भवोद्भवाद्य त्वयि भक्त्या भगवन भवाब्धिपारम् ।

भसितैर्भवपाशनाशकैः परिधूल्य क्रमशस्तरन्ति भावाः ॥ १०॥

चित्तं त्रिनेत्रसुचरित्र विचित्रगाथाश्रोत्रश्रवेण निखिलं च पवित्रगात्रम् ।
वाञ्छा न मां भजति पुत्रकलत्रमित्त सत्रातिरात्र विविधेषु मखेषु शम्भो ॥ ११॥

तुरङ्गदन्त्युत्तमभूमिदानैः रत्नादिकन्यासुमहान्नदानैः ।
अर्घ्यप्रदानैरखिलैश्च धर्मैरलं महेशानपदं व्रजामि ॥ १२॥

॥ इति शिवरहस्यान्तर्गते महाकालकृता महेश्वरतुष्टिकरणस्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः ६। ५६-६७॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 6. 56-67..

Notes:

The shlokas have been renumbered for readers’ convenience.

Proofread by Ruma Dewan

*Maheshvara Tushtikarana Stuti by Mahakala*
pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*